# सुबन्धुः तस्य साहित्यकृतिश्च

## सुबन्धुः

गद्यस्य साहित्यिकं स्वरूपं प्रकटीकृत्य आत्मानं गौरवान्वितं कृतवत्सु कविषु सुबन्धुरेव प्रथमत्वेन प्रतिपन्नः सर्वैः। ननु कस्तावत् तस्य सुबन्धोः समयः इति प्रश्नो भवति चेत् विषयेऽस्मिन् समाधिः निगद्यते –

प्रथमतः – अयं सुबन्धुः स्वग्रन्थे–

"सारसवत्ता विहता नवका विलसन्ति चरति नो कङ्कः।

सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये॥"

इत्यादिना यं विक्रमादित्यं स्मरति सः कतमः विक्रमादित्यः? अस्मिन् प्रसङ्गेऽधिका आलोचका मिहिरकुलनामकस्य हूणराजस्य पराजेता बालादित्यसखो यशोधर्मा एवायं विक्रमादित्य इति निर्णयन्ति, यशो धर्मणः समयश्च षष्ठशतकस्य मध्यभाग इति निर्णयन्ति। एतेन सुबन्धोः समयः षष्ठशतकस्य पूर्वभाग इति वक्तुं शक्यते।

द्वितीयतः – बाणभट्टः सुबन्धोः कथां 'धिया निबद्धेयमतिद्वयी कथा' इत्येवं स्मरति। बाणः सप्तमशतकोत्पन्नः इति सुबन्धोस्ततः पूर्ववर्त्तित्वेन सुबन्धोः षष्ठशतकपूर्वभवत्वं युज्यत एव।

तृतीयतः – सुबन्धुः स्वरचितायां वासवदत्तायाम् श्लेषद्वारा उद्योतरकं स्मरति - ‘न्यायस्थितिमिवोद्योतकरस्वरूपाम्’ इति। अस्य उद्योतकरस्य समयः खलु षष्ठसप्तमशताब्दयोः अन्तराले मन्यते। एभिर्निदर्शनैः सुबन्धोः समयः षष्ठशतकं मन्यते। आदिमचरमभागादि विशिष्य निर्णयस्तु स्फुटप्रमाणाभावाद् असुकर एव।

## वासवदत्ता

वासवदत्तानामक एक एव ग्रन्थः सुबन्धुकृतित्वेन सुपरिचितः। कल्पितकथाया अस्या आख्यायिकायाः नामकरणम् उदयनकथाप्रसिद्धायाः वासवदत्ताया नामानुसारं न वेति विषये वर्तते महान् तर्कः। अस्या एव वासवदत्तायाः प्रशंसायाम् बाणभट्टः हर्षचरिते लिखति –

“कवीनामगलद्दर्पो नूनं वासवदत्तया।
शक्त्येव पाण्डुपुत्राणां नूनं वासवदत्तया॥” इति।

शब्दालंकाराणां तथा अर्थालंकाराणां किञ्च रसानां प्रयोगसौष्ठवेन वासवदत्तायाः तुलनात्मकविचारेण अन्यः कोऽपि गद्यग्रन्थः नास्तीति वक्तुं शक्यते। सुबन्धोः वासवदत्ता श्लेषप्रधानं कथात्मकं गद्यकाव्यम्।

राज्ञः चिन्तामणेः पुत्रस्य कन्दर्पकेतोः तथा कुसुमपुराधिपतेः शृङ्गारशेखरेस्य कन्यायाः वासवदत्तायाः प्रणयवृत्तम् अस्य गद्यकाव्यस्य प्रधानम् उपजीव्यम्। परमासुन्दरीं राजकन्यां वासवदत्ताम् स्वप्नमध्ये दृष्ट्वा कन्दर्पकेतुः तस्य बान्धवेन मकरन्देन सह तस्याश्च अन्वेषणार्थं बहिर्गतवान्। वासवदत्तापि कस्यचित् अनिन्द्यसुन्दरस्य राजपुरुषस्य स्वप्नदर्शनं कृत्वा सखायै

तमालिकायै तद्विज्ञापितवती। विन्ध्यपर्वतस्य एकस्मिन् अरण्ये शूकशारीकथोपकथनात् कन्दर्पकेतुः ज्ञातवान् यद्, वासवदत्तायाः पिता कस्यचित् विद्याधर-राजकुमारस्य हस्ते कन्यासम्प्रदानं करिष्यतीति। एतच्छ्रुत्वा कन्दर्पकेतुः वासवदत्तामादाय अपलायत् नक्तं च अरण्ये एव अतिवाहययत्। प्रातश्च वासवदत्ता फलमूलादीनां संग्रहार्थम् बहिर्गतवती। तां च स्वकरगतां कर्तुं द्वे किरातसैन्यौ युद्धलिप्तौ अभवताम्, मरणं च सम्प्राप्तौ। ऋषेः आश्रमस्य पवित्रता यतो विनष्टा तस्मात् वासवदत्ता ऋषिणा अभिशप्ता। तदा वासवदत्ता अपि पाषाणावस्थां सम्प्राप्तवती। वासवदत्ताम् अप्राप्य आत्मत्यागं कर्तुम् उद्यतः कन्दर्पकेतुः दैवीं वाणीं श्रुतवान् यत्, गतया प्रियया सह तस्य पुनर्मेलनं भविता। अरण्यमार्गे च अटन् कन्दर्पकेतुः प्रियतमायाः अनुरूपं शिलामूर्तिम् अवलोक्य यावत् तां शिलामूर्तिं स्पृष्टवान् तावत् सा मूर्तिः जीवन्ती समुत्थिता। पुनश्च तयोः मिलनम् अभवत्। वासवदत्तायाः अयम् आख्यानभागः यद्यपि तादृशं गुरुत्वम् न भजते तथापि रचनानैपुण्येन तदासीत् अत्यन्तम् उपभोग्यम्। अनेन कवेः बहुशास्त्रपारङ्गमता अपि स्फुटा दृश्यते। श्लेष-विरोधाभासादीनाम् अलंकाराणां वाहुल्यम् तथा समासवद्धानां पदानां भूयो व्यवहारोऽपि कवेः तेषु तेषु विषयेषु दाक्ष्यमेव प्रकटीकरोति।

इदमपि सत्यं यत् बाणस्य रमणीयार्थप्रतिपादनसमये रमणीयशब्दसृष्टिः, प्रसादः काव्यापेक्षिता गुणाश्च सुबन्धौ न सन्ति, न वा दण्डिनः पदलालित्यादिकमेव विद्यते, तथापि विद्वज्जनानां हृदयहारिश्लेषादिविविधालङ्कारसर्गतः सुबन्धुः पण्डितपाठकानां हृदयानि आक्रष्टुम् अलमिति शम्॥